# मूलस्तरीयं गणतन्त्रम् - प्रथमः भागः
# प्रशासनम्

*" राजानं धर्मगोप्तारं धर्मो रक्षति रक्षितः " इति।*

*"शासकाः धर्मं रक्षन्ति, यैः धर्मो रक्षितः, धर्मः तान् रक्षति।"*

*- महाभारतम्*

*"न्यायमृते न शान्तिरस्ति,*
*न न्यायं साम्यमृते,*
*न साम्यं विना विकाशम्,*
*न गणतन्त्रं लोकसंस्कृतयोः परिचयगौरवानां सम्माननं विना ।"*

*- रिगोबार्ट् मेन्चु तुम्*

**मूलभूताः प्रश्नाः ?**

१. 'प्रशासनम्' इत्यस्य कः अर्थः ?
२. किमर्थं सर्वकारस्य आवश्यकता अस्ति ?
३. गणतन्त्रस्य कः अर्थः ? किमर्थं गणतन्त्रं महत्त्वपूर्णम् अस्ति ?

0681CH10

© NCERT not to be republished



## भूमिका

मानवसमाजः सुप्राचीनकालादेव गोष्ठीवद्धः सन् समुदायेषु निवसन् अस्ति। यदा बहुसङ्ख्यकाः जनाः मिलित्वा निवसन्ति तदा मतभेदाः अव्यवस्थाश्च भवितुम् अर्हन्ति एव। अतः समाजे व्यवस्थां सौहार्दं च स्थापयितुं नियमानि आवश्यकानि भवन्ति।

गृहे प्रायः केषाञ्चन सरलनियमानाम् अनुपालनं भवतां कृते अपेक्षितम् अस्ति। अपि विद्यालयेषु यत्र भवन्तः पठन्ति, तत्रापि कानिचन नियमानि सन्ति - तेषु कानिचन छात्राणां कृते, अन्यानि च शिक्षकाणां कृते सन्ति। उच्चकक्षासु परीक्षार्थं छात्रैः निर्दिष्टनियमानां पालनं अवश्यमेव करणीयमस्ति। मार्गे वाहनचालकैरपि आवागमननियमानां पालनं कर्तव्यमस्ति। सर्वविधकार्येषु नियोजितैः जनैरपि स्वनियोक्तृभिः निर्धारितनियमानाम् अनुसरणं कर्तव्यं, नियोक्तारश्च स्वकर्मचारिणः प्रति प्रतिबद्धाः सन्ति इत्यतः तन्निष्ठनियमानां पालनं तैरपि करणीयं भवति।

यदि कोऽपि एतेषां नियमानाम् अनुसरणं न कुर्वन्ति तर्हि किं भविष्यति? अस्य सरलम् उत्तरम् अस्ति यत् समाजः तदा सुष्ठरूपेण कार्यं कर्तुं न समर्थः भविष्यति।

### आगच्छन्तु, वयम् अन्विषामः



→ १५१ तमे पृष्ठे १०.१ इति अंशे यत् चित्रद्वयं दत्तमस्ति, तयोः वर्णनं कुर्वन्तु - द्वयोर्मध्ये के भेदाः सन्ति?

→ नियमानां विषये अस्माकम् चर्चया सह कथम् एतद् योजयितुं शक्यते?

→ भवतां विद्यालये कानि नियमानि सन्ति? कश्च तानि निर्मितवान्?

नियमानां निर्माणं कः करोति, किमर्थं च? नियमानां निर्माणं कथं भवति? एतादृशाः केचन प्रश्नाः सन्ति येषाम् अन्वेषणं वयम् अस्मिन् अध्याये करिष्यामः।

सा प्रक्रिया प्रशासनम् इति कथ्यते यत्र जनकल्याणार्थं सिद्धान्ताः गृह्यन्ते, भिन्नभिन्ननियमद्वारेण सुव्यवस्थितस्य समाजजीवनस्य निर्माणम् क्रियते एवञ्च तेषां नियमानाम् यथायोग्यरूपेण अनुसरणं भवतु इत्यस्य कृते प्रयासाः अपि क्रियन्ते। व्यक्तिसमूहः व्यवस्था वा, यद् नियमं करोति, तेषां पालनं भवतु इति सुनिश्चितं च करोति, तद् 'सर्वकारः' इति कथ्यते। तत्र यानि नियमानि अधिक-महत्त्वपूर्णानि भवन्ति तानि 'विधिः' इति कथ्यन्ते।

अस्य अयम् अर्थः नास्ति यत् नियमानि एकदा एव सर्वेषां कृते निर्धारितानि भवन्ति। उदाहरणार्थं भवन्तः गृहे स्वपितृभिः सह कस्यचित् नियमविशेषस्य विषये चर्चां कर्तुं

© NCERT not to be republished

शक्नुवन्ति। अपि छात्रसङ्घत्वेन भवन्तः विद्यालयस्य विश्वविद्यालयस्य वा प्रबन्धनविभागं प्रति कस्यापि नियमस्य परिवर्तनाय वक्तुं शक्नोति। समाजस्य चालनार्थं यानि नियमानि, ये विधयश्च सन्ति, तत्र नागरिकाणामपि मतप्रदानस्य अधिकारः अस्ति। एतत् कथं भवति इति वयं पश्यामः।




चित्रम्. १०.१.



चित्रम्. १०.२.

## एहि, वयम् अन्विषामः




- किं भवन्तः सार्वजनिकसेवायाः अन्येषां कार्यकलापानां वा प्रकारान् ज्ञातुं शक्नुवन्ति? १५२ तमे पृष्ठे १०.२ इति अंशे दशचित्रेषु एते प्रकाराः दर्शिताः भवन्ति। तान् अन्विष्यन्तु।
- भवतां मते एतेषु प्रत्येकस्मिन् क्षेत्रे सर्वकारस्य का भूमिका अस्ति?
- किं भवन्तः स्वस्य दैनन्दिनजीवनस्य अन्यान् पक्षान् चिन्तयन्ति यत्र सर्वकारस्य महत्त्वपूर्णभूमिका अस्ति?

## सर्वकारस्य त्रीणि अङ्गानि

सम्पूर्णे विश्वे यान्त्रिकीप्रयुक्तिमाध्यमाः समाजस्य कार्यप्रणालीं परिवर्तयन्ति। प्रायः त्रिंशद्वर्षपूर्वं यावदपि भारते ये जनाः दूरस्थबन्धुजनाय धनं प्रेषयितुम् इच्छन्ति स्म, ते पत्रालयं गत्वा पङ्क्तिबद्धाः सन्तः प्रपत्रं पूरयित्वा मुद्रापत्रं(मनी आर्डर्') प्रेषयन्ति स्म। अथवा यदि ते कस्मैचित् व्यवसायाय भुक्तिं प्रेषयितुम् इच्छन्ति स्म, तर्हि स्ववित्तालयं गत्वा पङ्क्तिबद्धाः सन्तः डिमान्ड-ड्राफ्ट इति स्वीकुर्वन्ति स्म। ततः ते पत्राचारमाध्यमेन तत् प्रेषयन्ति स्म। भवन्तः कदाचित् ('मनी आर्डर्', 'डिमाण्ड् ड्राफ्ट') इति एतादृशशब्दान् न श्रुतवन्तः, यतः अद्यत्वे धनं तत्क्षणमेव प्रेषयितुं बहूनि यान्त्रिकसाधनानि उपलभ्यन्ते!

परन्तु अनेन माध्यमेन अपराधिनां एकः नूतनः वर्गः अपि निर्मितः अस्ति, ये स्वस्थानं अत्यक्त्वा एव जनानां धनचौर्यस्य यान्त्रिकीप्रयुक्तिमाध्यमानि अन्विष्यन्ति। अनेके सर्वकाराः एतादृशानां अपराधानां निवारणार्थं नूतनानि नियमानि कृतवन्तः ('सैबर्क्रैम्' इति उच्यते)। तत्र ये अपराधिनः समाजस्य हिताय योगदानं दातुं स्वकौशलस्य उपयोगस्य अपेक्षया निर्दोषजनानां कष्टार्जितं धनं लुण्ठन्ति, ते न्यायालये गृहीताः दण्डिताश्च सन्ति। प्रायः तेषां कृते आर्थिकदण्डाः निर्धार्यन्ते। तेन सह कतिपयवर्षाणि यावत् कारावासः अपि भवति।

अस्य उदाहरणस्य माध्यमेन कस्यचित् सर्वकारस्य इमाः तिस्रः शाखाः(अङ्गानि वा) कथं मिलित्वा कार्यं कुर्वन्ति इति वयं द्रष्टुं शक्नुमः।

- तेषु **विधायिकः** अस्ति तद् अङ्गं यद् नूतनानां नियमानां निर्माणं करोति। (अथवा'विधानं करोति')। कदाचित् एतद् विद्यमानानां नियमानाम् अद्यतनीकरणं निष्कासनं वा अपि करोति।

© NCERT not to be republished


- एतत् कार्यं जनप्रतिनिधिसङ्घेन क्रियते। भारतीयशासनव्यवस्था कथं कार्यं करोति इति शीघ्रमेव पश्यामः।
- कार्यपालिका अस्ति तद् अङ्गं यद् नियमानाम् कार्यान्वयनम् करोति (क्रियान्वयनं करोति)। अस्मिन् देशस्य प्रमुखाः प्रशासनिकाः (ते राष्ट्रपतिः, प्रधानमन्त्री मुख्यमन्त्री वा भवितुम् अर्हन्ति।), मन्त्रिणः, प्राप्तदायित्वः "विधि व्यवस्था च" इत्यनेन सह सम्बद्धः कश्चन अभिकरणः इत्यादयः अन्तर्भवन्ति। (उपरि यद् उदाहरणं दत्तम् अस्ति, तत्र 'साइबर पुलिस' इति सः अभिकरणः अस्ति।)
- न्यायपालिका अस्ति तृतीयम् अङ्गम्। न्यायालयव्यवस्था एव निर्णयं करोति यत् केनचित् नियमस्य उल्लङ्घनं कृतम् वा इति। यदि अस्ति तर्हि तस्य कृते का व्यवस्था स्वीकरणीया, आव्यश्यकं चेत् कश्च दण्डः दातव्यः इत्यादीनां निर्णयः अपि न्यायालयमाध्यमेनैव क्रियते। कदाचित् न्यायपालिकया गृहीतः निर्णयः सम्यक् अस्ति वा, अथवा विधायकैः पारितानि नियमानि सुविचारितानि तथा च सर्वेषां कृते युक्तानि वा इत्यस्य परीक्षणमपि क्रियते।



## एहि, वयम् अन्विषामः

उपरि वर्णित-साइबर-अपराधेषु एतत्त्रयं सर्वकारीयअङ्गं कथं कार्यं करोति इति व्याख्यातव्यम्।

कस्यापि सुशासनव्यवस्थायां एतानि त्रीणि अङ्गानि पृथक् स्थापनीयानि, यद्यपि तानि परस्परं संयुक्तानि सन्ति, मिलित्वा च कार्यं कुर्वन्ति। पृथक्करणस्य इयं प्रक्रिया 'क्षमतायाः विकेन्द्रीकरणम्' इति उच्यते। (चित्र. १०.३). विधिव्यवस्थायां निरन्तरं संशोधनं सन्तुलनं च अस्य उद्देश्यम् अस्ति। अर्थात् अनेन सर्वकारस्य प्रत्येकं अङ्गं अन्यस्य कार्यं परीक्षितुं शक्नोति तथा च यदि तेषु कश्चन अङ्गः स्वस्य अपेक्षितभूमिकाम् अतिरिच्य किमपि कार्यं करोति, तर्हि संतुलनं पुनः स्थापयितुं शक्नोति।



चित्रम्. १०.३

© NCERT not to be republished


## एहि, वयम् अन्विषामः

वर्गक्रियारूपेण भवन्तः कल्पयितुं शक्नुवन्ति यत् एतानि त्रीणि अपि अङ्गानि यदि एकस्यैव समुदायस्य अधीने भवन्ति स्म तर्हि किदृशी अव्यवस्था भवितुं शक्नोति? किं भवन्तः एतादृशं किमपि वास्तविकस्थितिं वर्णयितुं शक्नुवन्ति यत् भवन्तः श्रुतवन्तः?



## सर्वकारस्य त्रीणि स्तराणि

कोऽपि सर्वकारः न्यूनातिन्यूनं द्वयोः स्तरयोः कार्यं करोति — स्थानीयस्तरे केन्द्रीयस्तरे च। अनेकेषु देशेषु, यथा भारते सर्वकारस्य त्रीणि स्तराणि सन्ति - स्थानीयस्तरः, राज्यस्तरः अपि च केन्द्रीयस्तरः। तत्र प्रत्येकं स्तरं भिन्न-भिन्न-विषयान् आदाय कार्यं करोति। उदाहरणार्थं, यदि भवतः/भवत्याः गृहे कोऽपि विद्युद्दीपः न प्रकाशते, तर्हि भवान्/भवती आदौ विद्युद्दीपः, पिञ्जः, फ्यूज इत्यादीनां परीक्षणं करिष्यति। यदि तेन कार्यं न भवति तर्हि कमपि विद्युत्कर्मिणम् आह्वातुं शक्नोति। ततः यदि च ज्ञायते यत् समस्या केवलं भवतः/भवत्याः गृहे नास्ति तर्हि भवान्/भवती विद्युन्मण्डलं(इलेक्ट्रिसिटि वोर्ड) गत्वा परिवादं पञ्जीकर्तुं शक्नोति। एवंप्रकारेण एतेषु त्रिषु स्तरेषु वयं समस्यायाः समाधानं कर्तुं शक्नुमः।




चित्रम्. १०.४

© NCERT not to be republished

अस्माकं भारते स्थानीयसर्वकाराः, राज्यसर्वकाराः, केन्द्रीयसर्वकारश्चेति त्रीणि स्तराणि (१५५ तमे पृष्ठे १०.४ इति अंशे) सन्ति। कल्पयन्तु यत् कतिपयदिनानि यावत् प्रचण्डवर्षा चलति। तेन कस्यचित् जनपदस्य एकस्मिन् भागे वन्या जाता। यदि सा वन्यास्थितिः अतिगम्भीरा न स्यात् तर्हि स्थानीयाधिकारिणः तस्य निवारणं कर्तुं शक्नुवन्ति। किन्तु यदि तस्मात् कारणात् अनेकनगराणि बहवः ग्रामाश्च प्रभाविताः सन्ति तर्हि तत्र राज्यसर्वकारस्य भूमिका अपेक्षिता वर्तते। राज्यसर्वकारः तदा क्षतिग्रस्तजनानां साहाय्यार्थं उद्धारदलानि प्रेषयिष्यति। परन्तु यदि महद् जलप्लावनं भवति, येन व्यापकक्षेत्रं प्रभावितं भवति, तर्हि केन्द्रीयसर्वकारस्यापि साहाय्यम् तत्र अपेक्षितम् वर्तते। केन्द्रीयसर्वकारः तदा साहाय्यसामग्री, सेना इत्यादीनि प्रेषयित्वा साहाय्यं करोति। एते पुनः त्रीणि स्तराणि सन्ति।



## मा विस्मरन्तु

अस्माकं देशस्य अनेकासां संस्थानां मूलमन्त्राणि अस्माकं प्राचीनग्रन्थानां ज्ञानात् प्रेरिताः सन्ति। उदाहरणार्थं, '*सत्यमेव जयते*' *इति* भारतसर्वकारस्य आदर्शवाक्यम् अस्ति। अस्यार्थः अस्ति - सर्वदा सत्यस्यैव विजयः भवति इति। अस्माकं सर्वोच्चन्यायालयस्य आदर्शवाक्यम् अस्ति - '*यतो धर्मस्ततो जयः*' *इति*। यस्यार्थः - यत्र धर्मः अस्ति, तत्रैव विजयः अस्ति इति।

अग्रिमे पृष्ठे या पट्टिका अस्ति तत्र सारांशरूपेण राष्ट्रियराज्यस्तरयोः सर्वकारस्य त्रयाणां अङ्गानाम् मुख्यकार्याणां एका सामान्यरूपरेखा प्रदीयते। तेषां अधिकगहनतया अध्ययनं वयं (मन्त्रिसभानां सुनिर्दिष्टाः भूमिकाः अपि तत्र आलोचयिष्यन्ते।) सप्तमकक्षायां करिष्यामः। (अत्र स्थानीयशासनस्य उल्लेखः न कृतः यतः इतः परं अध्यायद्वये वयं तस्य कार्याणां विषये अधिकं निकटतया ज्ञास्यामः।)



## एहि, वयम् अन्विषामः

→ इमां पट्टिकां (१०.५ इत्यंशे दत्ता पट्टिका) ध्यानेन अवलोकयन्तु। तत्र यानि कार्याणि उत्तरदायित्वानि च भवतां जीवनं सर्वाधिकरूपेण प्रभावयन्ति, तानि निर्दिशन्तु।

→ द्वौ वा त्रयः वा प्रौढजनान् सर्वकारेण सह तेषां सम्बन्धस्य विषये अथवा सर्वकारेण सह आन्तरक्रियायाः विषये पृच्छन्तु _केषु स्तरेषु किमर्थं च तद् भवति?

© NCERT not to be republished

| | समग्रे भारते | राज्यस्तरे |
|---|---|---|
| न्यायपालिका | भारतस्य सर्वोच्चन्यायालयः | उच्चन्यायालयः |

| | केन्द्रीयः स्तरः | राज्यस्तरः |
|---|---|---|
| विधायकः | द्वे **सभे** - लोकसभा, राज्यसभा च।<br>राष्ट्रस्तरीयान् अधिनियमान् निर्मान्ति। | तत्र एका अस्ति राज्य-विधानसभा अथवा विधानसभा।<br>(अत्र ध्यातव्यमस्ति यत् अनेकेषु राज्येषु केवलम् एका एव विधानसभा अस्ति, स्वल्पसंख्यकेषु विधानसभाद्वयम् अस्ति।) |

| | केन्द्रीयः सर्वकारः | राज्यसर्वकारः |
|---|---|---|
| कार्यपालिका | भारतस्य राष्ट्रपतीनां नेतृत्वे (भारतीयसशस्त्रसेनायाः **औपचारिकः** नायकः)अस्माकं प्रधानमन्त्रीमहोदयाः सन्ति कार्यकारीप्रमुखः। | राज्यपालमहोदयस्य नेतृत्वे (औपचारिकः प्रमुखः) मुख्यमन्त्रिणः सन्ति कार्यकारीप्रमुखाः। |
| अधिकारिणां कार्याणि उत्तरदायित्वं च (एषा सूची सम्पूर्णा नास्ति।) | • रक्षा<br>• विदेशनीतिः<br>• परमाणु-ऊर्जा<br>• संचारः<br>• मुद्रा<br>• अन्तरराज्यीयवाणिज्यम्<br>• शिक्षा<br>• राष्ट्रियनीतीनां संरचना | • आरक्षकबलम्, विधिः व्यवस्था च<br>• राज्यस्तरे केन्द्रीयसर्वकारेण अधिनियमितानां विधिनाम् अनुकूलनम् तथा कार्यान्वयनम्।<br>• स्वास्थ्यम्<br>• शिक्षा<br>• कृषिः<br>• सेचनव्यवस्था<br>• स्थानीयप्रशासनम् |

चित्रम्. १०.५


**सभा -**

यत्र नियमानाम् विषये चर्चा भवति अथवा तानि नियमानि पारितानि भवन्ति।

**औपचारिकी -**

केवलम् औपचारिकः। अस्य अर्थः अस्ति यत्, अस्माकं भारतस्य राष्ट्रपतयः एवञ्च राज्यपालाः वास्तविककार्यकारीप्रमुखाः न भवन्ति। विशेषपरिस्थितीनां सन्दर्भे तेषाम् अधिकाराः निर्दिष्टाः सन्ति। परन्तु सामान्यतया ते केन्द्रीयराज्यसर्वकारयोः कार्येषु हस्तक्षेपं न कुर्वन्ति।

© NCERT not to be republished



## डॅ. ए.पि.जे. अब्दुल कलामः -

तमिलनाडुराज्यस्य रामेश्वरम्-नगरे एकत्रिंशदुत्तर-ऊनविंशतितमे (१९३१) वर्षे जातः डॅ. ए.पि.जे. अब्दुल कलाममहोदयः एकः प्रसिद्धः वैज्ञानिकः आसीत्, यः भारतस्य अन्तरिक्षकार्यक्रमस्य, पारमाणु-क्षेपण-कार्यक्रमस्य, पारमाणविकशक्तेः च विकासे महत्त्वपूर्णभूमिकां निर्वहन् 'भारतस्य अन्तरीक्षयान-मानवः ( मिसैल् म्यान् आफ् इण्डिया)' इत्युपाधिना अभिहितः आसीत्।

डॅ. कलाममहोदयाः द्व्युत्तरद्विसहस्रात् (२००२) सप्त्युत्तरद्विसहस्रं (२००७) वर्षं यावत् भारतस्य राष्ट्रपतिपदं अलङ्कृतवन्तः आसन्। यद्यपि तस्य उच्चपदवी अस्ति तथापि उत्तमशिक्षां प्रति नवीनान्वेषणं च प्रति तस्य अनुरागस्य माध्यमेन सः जनानां, विशेषतः युवसमाजैः सह प्रगाढतया सम्बद्धः अभवत्। तस्य विनम्रता, सामाजिकोत्तरदायीत्वानां विषये समर्पणभावना एवञ्च राष्ट्रं प्रति प्रतिबद्धता इत्यादिगुणैः सः असंख्यमानवानां कृते प्रेरणास्रोतः अभवत्। सः अविचलरूपेण भारतीययुवकान् बृहत्स्वप्नं द्रष्टुं, स्वलक्ष्यं प्राप्तुं परिश्रमं च कर्तुं निरन्तरं प्रोत्साहितवान्।

कलाममहोदयाः दर्शितवन्तः यत् भारतस्य राष्ट्रपतित्वेन तस्य पदं यद्यपि औपचारिकम् एव अस्ति तथापि अगणितजनानां प्रेरणारूपेणापि सः महत्त्वपूर्णभूमिकां निर्वाहयितुं शक्नोति।

तस्य कतिपयप्रेरणात्मकविचाराणां विषये चिन्तनं कुर्मः।

" आकाशं पश्यन्तु। वयम् एकाकिनः न स्मः। इदं सम्पूर्णं जगत् अस्माकं मित्रवत् अस्ति तथा च यः लक्ष्यं सुनिश्चित्य तत् प्राप्तुं परिश्रमं करोति, तस्य कृते सः सर्वोत्तमं दातुं कार्यं करोति।"

"कार्येषु साफल्यं प्राप्तुं अवश्यमेव भवन्तः स्वलक्ष्यं प्रति एकाग्रतया दृढनिष्ठाः भवन्तु।"

"यदि भवन्तः असफलाः भवन्ति तर्हि कदापि प्रयासं मा त्यजन्तु यतो हि 'एफ्.ए.आई.एल्.' इत्यस्य अर्थः भवति - 'फार्स्ट एटेम्ट् इन् लार्निङ्' (असाफल्यं हि ज्ञानप्राप्तेः मार्गस्य प्रथमः प्रयासः इति)। समाप्तिः इत्यस्य अन्तः इति नार्थः। वस्तुतः 'ई.एन्ड्.डी.' इत्यस्य अर्थः 'एफर्ट् नेभर् डाई' (समाप्तिः इत्यार्थः - प्रयासः कदापि विफलो न भवति इति)। यदि कस्मिंश्चित् उत्तरे 'एन्.ओ.' इति प्राप्तम्, तर्हि तदर्थः 'अग्रिमः अवसरः' इति। तस्मात् सर्वदा सकात्मकतया तिष्ठेयुः।

"सः न स्वप्नः यं भवान्/भवती निद्रायां पश्यति, स एव स्वप्नः यः भवन्तं/भवतीं कदापि न शाययति।"

"यदि एते चत्वारः विषयाः अनुसृताः सन्ति - महतः लक्ष्यस्य निश्चयः, ज्ञानप्राप्तिः, परिश्रमः, अध्यवसायः चेति - तर्हि किमपि साधयितुं शक्यते।"

© NCERT not to be republished

## गणतन्त्रम्

भवन्तः अवलोकितवन्तः स्युः यत् इतः पूर्वं वयं 'जनप्रतिनिधिः' इति शब्दस्य उल्लेखं कृतवन्तः। विश्वस्य अधिकांशदेशेषु स्वीकृतायाः शासनव्यवस्थायाः आधारशिलानाम् अन्यतमम् अस्ति — **गणतन्त्रम्**। 'गणतन्त्रम्' इति शब्दः ग्रीकशब्दद्वयात् आगतः अस्ति — 'डेमोस्' इति शब्दस्य अर्थः भवति 'जनाः' एवञ्च 'क्र्याटोस्' इति शब्दस्य अर्थः भवति 'शासनम्' 'शक्तिः' वा। अतः डेमोक्रेसिशब्दस्य अर्थात् गणतन्त्रस्य व्युत्पत्तिलब्धः अर्थः भवति जनगणस्य शासनम् इति।

परन्तु सर्वे जनाः वस्तुतः शासनं कर्तुं शक्नुवन्ति वा? प्रकृते तु तत् कदापि न सम्भवति। कल्पयन्तु यत् भवतः/भवत्याः कक्षायाः सर्वे मिलित्वा कस्याः अपि समस्यायाः विषये विद्यालयस्य प्राचार्यं ज्ञापयितुम् इच्छन्ति - कदाचित् कक्षायां, विद्यालयस्य आधारभूतसंरचनायां वा कोऽपि दोषः स्यात्, अथवा भवन्तः क्षेत्रपर्यटनस्य कृते निश्चिततिथिं प्रस्तावयितुम् इच्छन्ति। किं तदा कक्षायाः सर्वे एव प्राचार्यस्य समीपं गमिष्यन्ति? स्पष्टतया एव एतत् सम्यग् न भवति। अनेकेषु विद्यालयेषु एकस्याः कक्षायाः कृते एकः 'वर्गनिरीक्षकः' 'वर्गप्रतिनिधिः' वा भवति। कक्षायाः सर्वे मिलित्वा तस्य प्रतिनिधेः निर्वाचनं करोति। नास्ति चेदपि एतादृशविशिष्टप्रयोजननिमित्तम् एकस्य प्रतिनिधेः चयनं कर्तुं शक्यते। तं प्रतिनिधिमेव केवलं प्राचार्यस्य समीपे प्रेषयितुं शक्यते।

निर्वाचनद्वारया जनाः प्रतिनिधीनां चयनार्थं मतदानं कुर्वन्ति। ते निर्वाचिताः **जनप्रतिनिधयः** स्वस्वमन्त्रिसभानां निर्वाचितसदस्याः भविष्यन्ति। सामान्यतया राज्यस्तरे (विधानसभायाम्) ते **विधायकाः** (मेम्वारस् अफ लेजिसलेटिभ एसेम्वलि - एम.एल.ए) इति कथ्यन्ते, राष्ट्रीयस्तरे (संसदि) च ते **सांसदाः** (मेम्वारस् अफ पार्लामेन्ट - एम.पि) इति कथ्यन्ते। एते सर्वे सदस्याः सभासु विभिन्ननियमानां, समस्यानां, तेषां समाधानानां च विषये चर्चां कुर्वन्ति तथा च यदा कदापि तत्र भिन्नमताः भवन्ति तदा पारस्परिकसंवादेन वाद-विवादमाध्यमेन च ते परस्परं प्रत्याययितुं प्रयतन्ते।



कस्यापि आधुनिकलोकतन्त्रस्य सदृशं भारतेऽपि प्रतिनिधि-गणतन्त्रम् अस्ति।

© NCERT not to be republished

इदं विश्वस्य बृहत्तमं लोकतन्त्रम् अपि अस्ति, यत्र २०२४ तमे वर्षे प्रायः ९७० कोटिमतदातारः आसन्! नियमानुसारम् अष्टादशवर्षाधिकाः सर्वे भारतीयनागरिकाः एतेषु निर्वाचनेषु भागं ग्रहीतुं शक्नुवन्ति।

कल्पयन्तु यत् भवतः/भवत्याः कक्षायाः सर्वे भ्रमणार्थं गन्तुं इच्छन्ति। तत्र सम्भावितं स्थानद्वयम् अस्ति - क-स्थानम् एवञ्च ख-स्थानम्। वर्गे तस्य सौविध्यासौविध्यनां विषये चर्चा चलति — दूरत्वं, समयः, व्ययः, मूलभूतसुविधानां उपलब्धता इत्यादीनां विषये। कस्मिन्नपि निर्णये आगमनं कठिनं भवति। अतः भवतां शिक्षकः निर्णयं करोति यत् मतदानेन अस्याः समस्यायाः समाधानं करिष्यते। क-स्थानस्य पक्षे ये छात्राः सन्ति, ते हस्तं उत्थापयन्ति, ततः ख-स्थानस्य पक्षे ये सन्ति, ते स्वहस्तं उत्थापयन्ति। यस्य स्थानस्य पक्षे अधिकसङ्ख्यकाः हस्ताः सन्ति, सः एव विकल्पः स्वीक्रियते। (एषा प्रक्रिया मतदानम् इति कथ्यते।) इदं प्रत्यक्षलोकतन्त्रस्य प्रकरणम् अस्ति यत्र स्थानस्य चयनार्थं प्रत्येकस्य छात्रस्य मतं गृहीतम् आसीत्।

मूलस्तरीय - गणतन्त्रम् इति पदं तद्व्यवस्थां सूचयति, यत् सामान्यनागरिकाणां सहभागितां समर्थयन्ति प्रोत्साहयन्ति च। १५५ तमे पृष्ठे १०.४ इत्यंशे यत् पिरामिडं वयं दृष्टवन्तः तस्य आधारः एषः एव अस्ति। एतादृशव्यवस्थायां नागरिकाः तेषां कृते गृहीतानां निर्णयानां विषये वक्तुं शक्नुवन्ति।

एतदनन्तरम् अग्रिमे अध्यायद्वये अपि च परवर्तिकक्षासु वयं भारतीयलोकतन्त्रस्य वैशिष्ट्यानां विषये इतोऽपि अध्ययनं करिष्यामः।

## अग्रे गमनात् प्राक् ...



- प्रशासनं प्रशासकं च विना कोऽपि देशस्य व्यवस्था न चलति।
- आधुनिकसर्वकारस्य त्रीणि अङ्गानि सन्ति - विधायिका,कार्यपालिका, न्यायपालिका च - एते मिलित्वा कार्यं कुर्वन्ति।
- भारतसर्वकारः त्रिषु स्तरेषु कार्यं करोति - केन्द्रीयस्तरे राष्ट्रियस्तरे वा, राज्यस्तरे, स्थानीयस्तरे च।
- लोकतन्त्रमिति अस्याः व्यवस्थायाः आधारशिला अस्ति। केन्द्रीयस्तरे राज्यस्तरे च निर्वाचितप्रतिनिधिनां माध्यमेन एतत् कार्यं करोति।

© NCERT not to be republished

## प्रश्नाः, कार्याणि, परियोजनाश्च

१. स्वयमेव परीक्षणं कुर्वन्तु - लोकतन्त्रस्य कः अर्थः? प्रत्यक्ष-लोकतन्त्रस्य प्रतिनिधि-लोकतन्त्रस्य च मध्ये कः भेदः अस्ति?

२. सर्वकारस्य त्रीणि अङ्गानि पुनः स्मर्यताम्। तेषां काः भूमिकाः सन्ति?

३. सर्वकारस्य त्रीणि स्तरानि किमर्थं आवश्यकानि?

४. परियोजनाः कोविड-१९ इति महामारीकाले यत् लॉकडाउन् इति अभवत्, तत् भवतां स्मरणे अस्ति। तस्मिन् समये यानि नियमानि सर्वकारेण कृतानि आसन्, तेषां सूचीं कुर्तुं शक्यते वा? तदा परिस्थितिनियन्त्रणार्थं सर्वकारस्य के के स्तराः संलग्नाः आसन्? तस्मिन् समये सर्वकारस्य प्रत्येकस्य अङ्गस्य भूमिका का आसीत्?

© NCERT not to be republished

# नूडल्स्

© NCERT
not to be republished

*'नूडल्स्' इति टिप्पणी डूल्स् इत्यनयोः संक्षिप्तं रूपम् !

